# Shri Krishna Mangala Stotram

# શ્રીકૃષ્ણમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Shri Krishnamangala Stotram 06 41

File name : kRRiShNamangalastotram.itx

Category : vishhnu, mangala, stotra, krishna

Location : doc_vishhnu

Proofread by : Saritha Sangameswaran

Description/comments : From stotrArNavaH 06-41

Latest update : January 6, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2022

*sanskritdocuments.org*

Shri Krishna Mangala Stotram

# શ્રીકૃષ્ણમઙ્ગલસ્તોત્રમ્

સર્વે વેદાઃ સાઙ્ગકલાપાઃ પરમેણ
 પ્રાહુસ્તાત્પર્યેણ યદદ્વૈતમખણ્ડમ્ ।
બ્રહ્માસઙ્ગં પ્રત્યગભિન્નં પુરુષાખ્યં
 તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧॥

માયાધિષ્ઠાનં પરિશુદ્ધં યદવિદ્યા
 સૂતે વિશ્વં દેવમનુષ્યાદિવિભેદમ્ ।
યસ્મિન્ જ્ઞાતે સા શશશૃઙ્ગેણ સમા સ્યાત્
 તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૨॥

શ્રીવૈકુણ્ઠે શ્રીધરણીલાલિતપાદઃ
 સર્વૈર્વેદૈર્મૂર્તિધરૈઃ સંસ્તુતકીર્તિઃ ।
આસ્તે નિત્યં શેષશયો યઃ પરમાત્મા
 તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૩॥

ધર્મત્રાણાયૈવ કૃતાનેકવિભૂતિઃ
 શ્વેતદ્વીપે ક્ષીરપયોધૌ કૃતવાસઃ ।
યો ભૃત્યાનામાર્તિહરઃ સત્ત્વસમૂહ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૪॥

ક્ષીરામ્ભોધેસ્તીરમુપાવ્રજ્ય સુરેશૈ-
 ર્બ્રહ્મેશાનેન્દ્રાદિભિરામ્નાયશિરોભિઃ ।
ભૂમેઃ સૌખ્યં કામયમાનૈઃ પ્રણતો ય-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૫॥

સર્વાત્માપિ સ્વાશ્રિતરક્ષાપરતન્ત્ર
 ઇશ્રીદેવક્યાં યો વસુદેવાદવતીર્ણઃ ।
ચક્રે લીલાઃ શ્રોતૃમનોનન્દવિધાત્રી-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૬॥

પુત્રં મત્વા યં પરમેશાનમજાતં
 પૂર્ણં માયોપાત્તશરીરં સુખરૂપમ્ ।
નન્દો મુક્તિં પ્રાપ યશોદા વ્રજપુર્યાં
 તસ્મૈ શ્રીકૃષ્ણાય નમો ॥ ૭॥

ગોપ્યો ગોપા ગોપકુમારાશ્ચ યદીયમ્ । (ગોપકુમારાપિ ગાવઃ)
 દૃષ્ટ્વા રૂપં સુન્દરમિન્દીવરનીલમ્ ।
મન્દસ્મેરં કુન્દરદં પ્રીતિમવાપુ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૮॥

બાલો ભૂત્વા માસવયા યોઽપિબદગ્રે
 પ્રાણૈઃ સાકં સ્તન્યમસુર્યાઃ કુલટાયાઃ ।
સ્વરસ્ત્યાકાઙ્ક્ષન્નાત્મજનાનાં જગદીશ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૯॥

પદ્ભધાં જઘ્નેઽનોઽસુરમુદ્યમ્ય તૃતીયે
 માસે દેવો યોઽખિલમાયાવિનિહન્તા ।
સન્તાપઘ્નઃ સાધુજનાનામમરેશ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૦॥

કણ્ઠે બદ્ધ્વા મૂર્ધ્નિ વિનિર્ભિદ્ય નિરસ્તઃ
 દુષ્ટો ગોષ્ઠે યેન તૃણાવર્તસુરારિઃ ।
સર્વજ્ઞેનાનન્તબલેનાતિવિમૂઢ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૧॥

ગોપાલાર્ભૈશ્ચારણલીલાં વિદધાનો
 ગોવત્સાનાં યો બકદૈત્યં વિદદાર ।
આસ્યાદારમ્યોદરમત્યુન્નતસત્ત્વં
 તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૨॥
માત્રે દૈત્યાચ્છઙ્કિતવત્યૈ દયયા યો
 ગોપ્યૈ લોકાન્ સ્વાત્મસમેતાન્ મુખપદ્મે ।
સ્વીયે સૂક્ષ્મેઽદર્શયદવ્યાહતશક્તિ-
 સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૩॥

નવ્યં ગવ્યં ક્ષીરમનીરં નવનીતં

ભુઙ્ક્તે પ્રીત્યા દત્તમદત્તં ચ યથેચ્છમ્ ।
સ્વાત્મારામાભ્યર્ચિતપાદોઽપિ ચ ગોષ્ટે
તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૪॥

કાલીયોઽહિઃ કલ્પિતશિક્ષાભયદાન-
સ્ત્યક્ત્વા તીર્થં યામુનમાત્મીયમવાપ ।
દ્વીપં યેનાનન્તબલેનાથ સસૈન્ય-
સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૫॥

ગોપાન્ યોઽપાદાપદ ઉદ્ધૃત્ય દવાગ્ને-
ર્મુગ્ધાન્ સ્નિગ્ધાન્ પવિત્રામલલક્ષ્મીઃ । (સ્વસ્ય જનાવનમૂર્તિઃ)
અષ્ટૈશ્વર્યોઽવ્યાહતલક્ષ્મીપતિરાદ્ય-
સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૬॥

પાપાચારોઽઘાસુરનામાહિશરીરઃ
શૈલાકારો યેન હતો મૂર્ધ્નિ વિભિન્નઃ ।
પ્રાપાત્મૈક્યં બ્રહ્મવિદામેવ તુ ગમ્યં
તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૭॥

ગોગોપાનાં શ્રોત્રમનોનેત્રસુખાનિ
પ્રાદુષ્કુર્વન્ ગોપવધૂનાં વ્રજમધ્યે ।
લીલાનાટ્યાન્યદ્ભુતરૂપાણિ ય આસ્તે
તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૮॥

વ્યત્યસ્તામ્ભોજાતપદો વેણુનિનાદૈઃ
સર્વાંલ્લોકાન્ સાતિશયાન્ કર્મસુ મૂઢાન્ ।
ચક્રેઽત્યન્તાનન્દવિધાનેન વને ય-
સ્તસ્મૈ શ્રીકૃષ્ણાય નમો મઙ્ગલધામ્ને ॥ ૧૯॥

ઇતિ શ્રીકૃષ્ણમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Saritha Sangameswaran

*Shri Krishna Mangala Stotram*

pdf was typeset on January 7, 2022

Please send corrections to *sanskrit@cheerful.com*